# Shriramachandravimshatih

# શ્રીરામચન્દ્રવિંશતિઃ

## Document Information

Text title : Anubhavanandacharyapranita Shriramachandravimshatih

File name : shrIrAmachandraviMshatiHanubhavAnandAchArya.itx

Category : raama, rAmAnanda, viMshati

Location : doc_raama

Author : anubhavAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીરામચન્દ્રવિંશતિઃ

રામં બ્રહ્મ તથાનન્દભાષ્યકારં જગદ્ગુરુમ્ ।
નત્ત્વા કરોમિ ભાવાર્થં શ્રીરામચન્દ્રવિંશતિમ્ ॥ ૧॥

સોદરહૃતરાજ્યશ્રીઃ સુગ્રીવઃ સહ મન્ત્રિભિઃ ।
યસ્ય ચાશ્રિતવાન્ પાદં રામચન્દ્રં નમામિ તમ્ ॥ ૨॥

રાવણન્યક્કૃતો દાન્તો વિભીષણો ભિયાકુલઃ ।
સ્વજનૈર્યત્પદં ચાગાદ્ રામચન્દ્રં નમામિ તમ્ ॥ ૩॥

રક્ષોધિનાથસઙ્ક્ષુબ્ધા સીતા સ્મૃતવતી ચ યમ્ ।
સ્વભક્તવન્દિતં નિત્યં રામચન્દ્રં નમામિ તમ્ ॥ ૪॥

ચન્દ્રાંશશોભિતે રમ્યેપુરા સરોવરોત્તમે ।
સસ્માર યં ગજો મુક્ત્યૈ રામચન્દ્રં નમામિ તમ્ ॥ ૫॥

પતિવ્રતાશિરોરત્ના ગૌતમધર્મચારિણી ।
અસ્મરચ્છાપમુક્ત્યૈ યં રામાચન્દ્રં નમામિ તમ્ ॥ ૬॥

કાલિન્દીપુલિને રમ્યે ધ્રુવઃ સસ્માર યં મુદા ।
લોકોત્તરપદપ્રાપ્ત્યૈ રામચન્દ્રં નમામિ તમ્ ॥ ૭॥

હીનાડપ્રાપ્તસહાયા ચ કૃષ્ણા સસ્માર યં પ્રભુમ્ ।
દયાલું કૃષ્ણરૂપં શ્રીરામચન્દ્રં નમામિ તમ્ ॥ ૮॥

જનકજનિતક્લેશાત્ કયાધૂનન્દનશ્ચ યમ્ ।
દીનાનાથેતિ સસ્માર રામચન્દ્રં નમામિ તમ્ ॥ ૯॥

યસ્ત્રાતા વેદશાસ્ત્રાણાં દણ્ડકવનપાવકઃ ।
સ્વભક્તવન્દિતં શાન્તં રામચન્દ્રં નમામિ તમ્ ॥ ૧૦॥

નક્તઞ્ચરસમૂહાશ્ચ વેદમાર્ગાવદૂષકાઃ ।
મુક્તાશ્ચ દર્શનાદ્ યસ્ય રામચન્દ્રં નમામિ તમ્ ॥ ૧૧॥

રાવણભગ્નપક્ષશ્ચ જટાયુર્માંસભોજનઃ ।
યં દૃષ્ટ્વા સદ્ગતિં લેભે રામચન્દ્રં નમામિ તમ્ ॥ ૧૨॥

સ્વધર્મત્યાગતો ભ્રષ્ટોઽજામિલઃ પુત્રછદ્મતઃ ।
યન્નામસ્મરણાન્ મુક્તો રામચન્દ્રં નમામિ તમ્ ॥ ૧૩॥

વાલી બાલરવિપ્રખ્યં યત્પદં ચ પુરસ્થિતમ્ ।
ધ્યાયન્ મોક્ષપદં લેભે રામચન્દ્રં નમામિ તમ્ ॥ ૧૪॥

ત્યક્ત્વા સર્વાણિ કૃત્યાનિ શરભઙ્ગસ્તપોધનઃ ।
સાકેતમગમન્ નત્ત્વા રામચન્દ્રં નમામિ તમ્ ॥ ૧૫॥

યચ્ચરણામ્બુજોદ્ભૂતા ગઙ્ગા દુર્ગતિનાશિની ।
તાપત્રયવિનાશાય રામચન્દ્રં નમામિ તમ્ ॥ ૧૬॥

સુગતિં શબરી લેભે નિગમકર્મગર્હિતા ।
આતિથ્યકરણાદ્ યસ્ય રામચન્દ્રં નમામિ તમ્ ॥ ૧૭॥

ધ્યાયન્ યસ્ય પદામ્ભોજં ભરતઃ સાશ્રુલોચનઃ ।
અવસત્ ત્યક્તરાજ્યશ્રી રામચન્દ્રં નમામિ તમ્ ॥ ૧૮॥

ગુહરાજોઽપ્યહન્ પાપં યદીયસ્પર્શમાત્રતઃ ।
ભવદારિદ્રયહર્ત્તારં રામચન્દ્રં નમામિ તમ્ ॥ ૧૯॥

જગન્નિમિત્તોપાદાનં સ્વભક્તાર્તિહરઃ પરઃ ।
ધ્યેયશ્ચાપ્યશ્ચ યઃ સ્વીયૈ રામચન્દ્રં નમામિ તમ્ ॥ ૨૦॥

મુચ્યતે સ્મરણાદ્ યસ્ય સદ્યો ભવભિયા નરઃ ।
બ્રહ્મેશાદ્યમરૈર્વન્દ્યં રામચન્દ્રં નમામિ તમ્ ॥ ૨૧॥

રામાનન્દપ્રશિષ્યેણાઽનુભવાર્યેણ નિર્મિતા ।
પઠતાં ધ્વાન્તહૃદ્ભૂયાચ્છ્રીરામચન્દ્રવિંશતિઃ ॥

ઇતિ શ્રીમદ્ અનુભવાનન્દાચાર્યપ્રણીતા શ્રીરામચન્દ્રવિંશતિઃ સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*